॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

प्रथमकाण्डे चतुर्थः प्रश्नः

सुत्यादिने कर्तव्या ग्रहाः

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

आ द॑दे॒ ग्रावा᳚ऽ*स्यद्ध्वर॒कृद् दे॒वेभ्यो॑ गंभी॒रमि॒म म॑द्ध्व॒रङ्कृ॑द्ध्युत्त॒मेन॑ प॒विनेन्द्रा॑य॒ सोम॒ꣳ॒ सु॒षु॑त॒म्मधु॑मन्त॒म्पय॑स्वन्तँ॒व्वृष्टि॒वनि॒मिन्द्रा॑य त्वा वृत्र॒घ्न इन्द्रा॑य त्वा वृत्र॒तुर॒ इन्द्रा॑य त्वाऽभिमा-ति॒घ्न इन्द्रा॑य त्वाऽऽदि॒त्यव॑त॒ इन्द्रा॑य त्वा वि॒श्वदे᳚व्यावते श्वा॒त्राः स्थ॑ वृत्र॒तुरो॒ राधो॑गूर्ता अ॒मृत॑स्य॒ पत्नी॒स्ता दे॑वीर् दे॒वत्रेमँ॒य्यँ॒ज्ञन्ध॒त्तोप॑हूता॒ः सोम॑स्य पि॒बतोप॑हूतो यु॒ष्माक॒ꣳ॒ ॥ [१] ॥ सोम॑ः पिबतु यत्ते॑ सोम दि॒वि ज्योति॒र्यत् पृ॑थि॒व्याँय्यँदु॒राव॒न्तरि॑क्षे॒ तेना॒स्मै यज॑मानायो॒रु रा॒या कृ॒द्ध्यधि॑ दा॒त्रे वो॑चो॒ धिष॑णे वी॒डू स॒ती वी॑डयेथा॒मूर्ज॑न्दधाथा॒मूर्ज॑म्मे धत्त॒म्मा वा॑ꣳ हिꣳसिष॒म्मा मा॑ हिꣳसि-ष्ट॒म्प्रागपा॒गुद॑गध॒राक्तास्त्वा॒ दिश॒ आ धा॑व॒न्त्वंब॒ नि ष्व॑र। यत्ते॑ सो॒माऽदा᳚भ्य॒न्नाम॒ जागृ॑वि॒ तस्मै॑ ते सोम॒ सोमा॑य॒ स्वाहा᳚ ॥ [२] ॥

(यु॒ष्माक॑ꣳ स्व॒र य॒त्ते नव॑ च) ॥ १ ॥

वा॒चस्पत॑ये पवस्व वा॒जिन् वृषा॒ वृष्णो॑ अ॒ꣳ॒शुभ्या॒ङ्गभ॑स्तिपूतो दे॒वो दे॒वाना᳚म्प॒वित्र॑मसि॒ येषा᳚-म्भा॒गोऽसि॒ तेभ्य॑स्त्वा॒ स्वांकृ॑तोऽसि॒ मधु॑मतीर्॒ न॒ इष॑स्कृधि॒ विश्वे᳚भ्यस्त्वेन्द्रि॒येभ्यो॑ दि॒व्येभ्य॒ः पार्थि॑वेभ्यो॒ मन॑स्त्वाऽष्टू॒र्व॑न्तरि॑क्ष॒मन्वि॑हि॒ स्वाहा᳚ त्वा सुभ॒वः सूर्या॑य दे॒वेभ्य॑स्त्वा मरीचि॒पेभ्य॑ ए॒ष ते॒ योनि॑ः प्रा॒णाय॑ त्वा ॥ [३] ॥

(वाचःसप्तचत्वारिꣳशत्) ॥ २ ॥

उपयामगृहीतोऽस्यन्तर्यच्छ मघवन् पाहि सोममुरुष्य रायः समिषो यजस्वाऽन्तस्ते दधामि द्यावापृथिवी अन्तरुर्वन्तरिक्षꣳ सजोषा देवैरवरैः परैश्चाऽन्तर्यामे मघवन् मादयस्व स्वांकृ-तोऽसि मधुमतीर्न इषस्कृधि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाऽष्टूर्वन्तरिक्ष-मन्विहि स्वाहा त्वा सुभवः सूर्याय देवेभ्य स्त्वा मरीचिपेभ्य एष ते योनिरपानाय त्वा ॥ [४] ॥

(देवेभ्यःसप्त च) ॥ ३ ॥

आ वायो भूष शुचिपा उप नः सहस्रन्ते नियुतो विश्ववार। उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम्॥ उपयामगृहीतोऽसि वायवे त्वेन्द्रवायू इमे सुताः। उप प्रयोभिरा गतमिन्दवो वामुशन्ति हि॥ उपयामगृहीतोऽसीन्द्रवायुभ्यान्त्वैष ते योनिः सजोषाभ्यान्त्वा ॥ [५] ॥

(आ वायो त्रिचत्वारिꣳशत्) ॥ ४ ॥

अयँवाम्मित्रावरुणा सुतः सोम ऋतावृधा। ममेदिह श्रुतꣳ हवम्। उपयामगृहीतोऽसि मित्रावरुणाभ्यान्त्वैष ते योनिरृतायुभ्यान्त्वा ॥ [६] ॥

(अयँवां विꣳशतिः) ॥ ५ ॥

या वाङ्कशा मधुमत्यश्विना सूनृतावती। तया यज्ञम्मिमिक्षतम्। उपयामगृहीतोऽस्यश्वि-भ्यान्त्वैष ते योनिर्माध्वीभ्यान्त्वा ॥ [७] ॥

(या वा मष्टादश) ॥ ६ ॥

प्रातर्युजौ वि मुच्येथामश्विनावेह गच्छतम्। अस्य सोमस्य पीतये॥ उपयामगृहीतोऽस्यश्विभ्यान्त्वैष ते योनिरश्विभ्यान्त्वा ॥ [८] ॥

(प्रातर्युजावेकान्नविꣳशतिः) ॥ ७ ॥

अयव्वेँनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने। इममपाꣳ सङ्गमे सूर्यस्य शिशुन्न विप्रा मतिभी रिहन्ति॥ उपयामगृहीतोऽसि शण्डाय त्वैष ते योनिर् वीरताम्पाहि ॥ [९] ॥

(अयव्वेँनः पञ्चविꣳशतिः) ॥ ८ ॥

तम्प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिम्बर्हिषदꣳ सुवर्विदम्प्रतीचीनव्वृँजनन्दोहसे गिराऽऽशुञ्जयन्तमनु यासु वर्द्धसे। उपयामगृहीतोऽसि मर्काय त्वैष ते योनिः प्रजाः पाहि ॥ [१०] ॥

(तम्प्रत्नथाषड्विꣳशतिः) ॥ ९ ॥

ये देवा दिव्येकादश स्थ पृथिव्यामध्येकादश स्थाऽप्सुषदो महिनैकादश स्थ ते देवा यज्ञमिमञ्जुषद्ध्वमुपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणो जिन्व यज्ञञ्जिन्व यज्ञपतिमभि सवना पाहि विष्णुस्त्वाम्पातु विशन्त्वम्पाहीन्द्रियेणैष ते योनिर् विश्वेभ्यस्त्वा देवेभ्यः ॥ [११] ॥

(ये देवास्त्रिचत्वारिꣳशत्) ॥ १० ॥

त्रिꣳशत्त्रयश्च गणिनो रुजन्तो दिवꣳ रुद्राः पृथिवीञ्च सचन्ते। एकादशासो अप्सुषदः सुतꣳ सोमञ्जुषन्ताꣳ सवनाय विश्वे॥ उपयामगृहीतो ऽस्याग्रयणोऽसि स्वाग्रयणो जिन्व यज्ञञ्जिन्व यज्ञपतिमभि सवना पाहि विष्णुस्त्वाम्पातु विशन्त्वम्पाहीन्द्रियेणैष ते योनिर् विश्वेभ्यस्त्वा देवेभ्यः ॥ [१२] ॥

(त्रि॒ꣳ॒शत्त्र॒यो॒द्वि॒च॑त्वारिꣳशत्) ॥ ११ ॥

उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य त्वा बृ॒हद्व॑ते॒ वय॑स्वत उक्था॒यु॒वे॒ यत्त॑ इन्द्र बृ॒हद्व॒य॒स्तस्मै᳚ त्वा॒ विष्ण॑वे त्वै॒ष ते॒ योनि॒रिन्द्रा॑य त्वोक्था॒यु॒वे᳚ ॥ [१३] ॥

(उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य॒द्वावि॑ꣳशतिः) ॥ १२ ॥

मू॒र्द्धानं॑न्दि॒वो अ॑र॒तिम्पृ॑थि॒व्या वै᳚श्वान॒रमृ॒ताय॑ जा॒तम॒ग्निम्। क॒विꣳ स॒म्राज॒मति॑थि॒ञ्जना॑ना-मा॒सन्ना पात्र॑ञ्जनयन्त दे॒वाः॥ उ॒प॒या॒मगृ॑हीतोऽस्य॒ग्नये᳚ त्वा वैश्वान॒राय॑ ध्रु॒वो॑ऽसि ध्रु॒वक्षि॑तिर् ध्रु॒वाणां᳚ ध्रु॒वत॒मोऽच्यु॑तानामच्युत॒क्षित्त॑म ए॒ष ते॒ योनि॑र॒ग्नये᳚ त्वा वैश्वा॒न॒राय॑ ॥ [१४] ॥

(मू॒र्द्धानं॒पञ्च॑त्रिꣳशत्) ॥ १३ ॥

मधु॑श्च॒ माध॑वश्च शु॒क्रश्च॒ शुचि॑श्च॒ नभ॑श्च नभ॒स्य॑श्चेषश्चो॒र्जश्च॒ सह॑श्च सह॒स्य॑श्च॒ तप॑श्च तप॒स्य॑-श्चोपया॒मगृ॑हीतोऽसि स॒ꣳ॒स॒र्पो᳚ऽस्यꣳहस्प॒त्याय॑ त्वा ॥ [१५] ॥

(मधु॑श्च॒त्रि॒ꣳ॒शत्) ॥ १४ ॥

इन्द्रा᳚ग्नी॒ आ ग॑तꣳ सु॒तङ्गी॒र्भिर् नभो॒ वरे᳚ण्यम्। अ॒स्य पा॑तन्धि॒येषि॒ता॥ उ॒प॒या॒मगृ॑हीतोऽसी-न्द्रा॒ग्निभ्या᳚न्त्वै॒ष ते॒ योनि॑रिन्द्रा॒ग्निभ्या᳚न्त्वा ॥ [१६] ॥

(इन्द्रा᳚ग्नी विꣳश॒तिः) ॥ १५ ॥

ओमा॑सश्चर्॒षणीधृतो॒ विश्वे॑ देवास॒ आ ग॑त। दा॒श्वाꣳसो॑ दा॒शुषः॑ सु॒तम्॥ उ॒प॒या॒मगृ॑हीतोऽसि॒ विश्वे᳚भ्यस्त्वा दे॒वेभ्य॑ ए॒ष ते॒ योनि॒र् विश्वे᳚भ्यस्त्वा दे॒वेभ्यः॑ ॥ [१७] ॥

(ओमा॑सो विꣳश॒तिः) ॥ १६ ॥

मरुत्वन्तँवृषभवाँवृधानमकवारिन्दिव्यꣳ शासमिन्द्रम्। विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवेम॥ उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ [१८] ॥

(मरुत्वन्तꣳषड्विꣳशतिः) ॥ १७ ॥

इन्द्र मरुत्व इह पाहि सोमँयथा शार्याते अपिबः सुतस्य। तव प्रणीती तव शूर शर्मन्ना-विवासन्ति कवयः सुयज्ञाः॥ उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ [१९] ॥

(इन्द्रैकान्न त्रिꣳशत्) ॥ १८ ॥

मरुत्वाꣳ इन्द्र वृषभो रणाय पिबा सोममनुष्वधम्मदाय। आ सिञ्चस्व जठरे मद्ध्व ऊर्मिन्त्वꣳ राजाऽसि प्रदिवः सुतानाम्॥ उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ [२०] ॥

(मरुत्वानेकान्नत्रिꣳशत्) ॥ १९ ॥

महाꣳ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाꣳ इव। स्तोमैर्वथ्सस्य वावृधे॥ उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर् महेन्द्राय त्वा ॥ [२१] ॥

(महानेकान्नविꣳशतिः) ॥ २० ॥

म॒हाꣳ इन्द्रो᳚ नृ॒वदा च॑र्षणि॒प्रा उ॒त द्वि॒बर्हा॑ अमि॒नः सहो᳚भिः। अ॒स्म॒द्रिय॑ग्वावृधे वी॒र्या᳚-यो॒रुः पृ॒थुः सु॒कृ॑तः क॒र्तृभि॑र्भू॒त्॥ उ॒प॒या॒मगृ॑हीतोऽसि महे॒न्द्राय॑ त्वै॒ष ते॒ योनि॑र् महे॒न्द्राय॑ त्वा ॥ [२२] ॥

(म॒हान् नृ॒वथ् षड्वि॑ꣳशतिः) ॥ २१ ॥

क॒दा च॒न स्त॒रीर॑सि॒ नेन्द्र॑ सश्चसि दा॒शुषे᳚। उपो॒पेन्नु म॑घव॒न् भूय॒ इन्नु ते॒ दान॑न्दे॒वस्य॑ पृच्यते॥ उ॒प॒या॒मगृ॑हीतोऽस्यादि॒त्येभ्य॑स्त्वा॥ क॒दा च॒न प्र यु॑च्छस्यु॒भे नि पा॑सि॒ जन्म॑नी। तुरी॑यादित्य॒ सव॑नन्त इन्द्रि॒यमा त॑स्थाव॒मृत॑न्दि॒वि॥ य॒ज्ञो दे॒वाना॒म्प्रत्ये᳚ति सु॒म्नमादि॑त्यासो॒ भव॑ता मृड॒यन्तः॑। आ वो॒ ऽर्वा॑ची᳚ सुम॒तिर् व॑वृत्याद॒ꣳ॒हो᳚श्चि॒द्या व॑रिवो॒वित्त॒राऽस॑त्॥ विव॑स्व आदि॒त्यै॒ष ते॑ सोम-पी॒थस्तेन॑ मन्दस्व॒ तेन॑ तृप्य तृ॒प्यास्म॑ ते व॒यन्त॑र्पयि॒तारो॒ या दि॒व्या वृष्टि॒स्तया᳚ त्वा श्रीणामि ॥ [२३] ॥

(व॒ः स॒प्तवि॑ꣳशतिश्च) ॥ २२ ॥

वा॒मम॒द्य स॑वितर्वा॒ममु॒ श्वो दि॒वेदि॑वे वा॒मम॒स्मभ्य॑ꣳ सावीः॥ वा॒मस्य॒ हि क्षय॑स्य दे॒व भूरे॑र॒या धि॒या वा॑म॒भाज॑ः स्याम॥ उ॒प॒या॒मगृ॑हीतोऽसि दे॒वाय॑ त्वा सवि॒त्रे ॥ [२४] ॥

(वा॒मंचतु॑र्विꣳशतिः) ॥ २३ ॥

अद॑ब्धेभिः सवितः पा॒युभि॒ष्ट्वꣳ शि॒वेभि॑र॒द्य परि॑पाहि नो॒ गय᳚म्। हिर॑ण्यजिह्वः सुवि॒ताय॒ नव्य॑से॒ रक्षा॒ माकि॑र्नो᳚ अ॒घशा॑ꣳस ईशत॥ उ॒प॒या॒मगृ॑हीतोऽसि दे॒वाय॑ त्वा सवि॒त्रे ॥ [२५] ॥

(अद॑ब्धेभि॒स्त्रयो᳚विꣳशतिः) ॥ २४ ॥

हिरण्यपाणिमूतये सवितारमुप ह्वये। स चेत्ता देवता पदम्॥ उपयामगृहीतोऽसि देवाय त्वा सवित्रे ॥ [२६] ॥

(हिरण्यपाणिंचतुर्दश) ॥ २५ ॥

सुशर्माऽसि सुप्रतिष्ठानो बृहदुक्षे नम एष ते योनिर् विश्वेभ्यस्त्वा देवेभ्यः ॥ [२७] ॥

(सुशर्माद्वादश) ॥ २६ ॥

बृहस्पतिसुतस्य त इन्दो इन्द्रियावतः पत्नीवन्तङ्ग्रहङ्गृह्णाम्यग्ना(३)इ पत्नीवा(३) स्सजूर्देवेन त्वष्ट्रा सोमम्पिब स्वाहा ॥ [२८] ॥

(बृहस्पतिसुतस्यपञ्चदश) ॥ २७ ॥

हरिरसि हारियोजनो हर्योः स्थाता वज्रस्य भर्ता पृश्ञेः प्रेता तस्य ते देव सोमेष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य हरिवन्तङ्ग्रहङ्गृह्णामि हरीः स्थ हर्योर्द्धानाः सहसोमा इन्द्राय स्वाहा ॥ [२९] ॥

(हरिरसिषड्विꣳशतिः) ॥ २८ ॥

अग्न आयूꣳषि पवस आ सुवोर्जमिषञ्च नः। आरे बाधस्व दुच्छुनाम्॥ उपयामगृहीतोऽस्य-ग्नये त्वा तेजस्वत एष ते योनिरग्नये त्वा तेजस्वते ॥ [३०] ॥

(अग्न आयूꣳषित्रयोविꣳशतिः) ॥ २९ ॥

उत्तिष्ठन्नोजसा सह पीत्वा शिप्रे अवेपयः। सोममिन्द्र चमू सुतम्॥ उपयामगृहीतोऽसीन्द्राय त्वौजस्वत एष ते योनिरिन्द्राय त्वौजस्वते ॥ [३१] ॥

(उत्तिष्ठन्नेकविꣳशतिः) ॥ ३० ॥

तरणिर् विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमा भासि रोचनम्॥ उपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वत एष ते योनिः सूर्याय त्वा भ्राजस्वते ॥ [३२] ॥

(तरणिर् विꣳशतिः) ॥ ३१ ॥

आ प्यायस्व मदिन्तम सोम विश्वाभिरूतिभिः। भवा नः सप्रथस्तमः ॥ [३३] ॥

(आ प्यायस्वनव) ॥ ३२ ॥

ईयुष्टे ये पूर्वतरामपश्यन् व्युच्छन्तीमुषसम्मर्त्यासः। अस्माभिरू नु प्रतिचक्ष्याऽभूदो ते यन्ति ये अपरीषु पश्यान् ॥ [३४] ॥

(ईयुरेकान्नविंꣳशतिः) ॥ ३३ ॥

ज्योतिष्मतीन्त्वा सादयामि ज्योतिष्कृतन्त्वा सादयामि ज्योतिर्विदन्त्वा सादयामि भास्वतीन्त्वा सादयामि ज्वलन्तीन्त्वा सादयामि मल्मलाभवन्तीन्त्वा सादयामि दीप्यमानान्त्वा सादयामि रोचमानान्त्वा सादयाम्यजस्रान्त्वा सादयामि बृहज्ज्योतिषन्त्वा सादयामि बोधयन्तीन्त्वा सादयामि जाग्रतीन्त्वा सादयामि ॥ [३५] ॥

(ज्योतिष्मतीꣳषड्विंꣳशत्) ॥ ३४ ॥

प्रयासाय स्वाहाऽऽयासाय स्वाहा वियासाय स्वाहा सय्ँयासाय स्वाहोद्यासाय स्वाहाऽवया-साय स्वाहा शुचे स्वाहा शोकाय स्वाहा तप्यत्वै स्वाहा तपते स्वाहा ब्रह्महत्यायै स्वाहा सर्वस्मै स्वाहा ॥ [३६] ॥

(प्रयासायचतुर्विꣳशतिः) ॥ ३५ ॥

चित्तꣳ सन्तानेन भवय्ँयक्ना रुद्रन्तनिम्ना पशुपतिꣴ स्थूलहृदयेनाग्निꣳ हृदयेन रुद्रँल्लोहितेन शर्वम्मतस्नाभ्याम्महादेवमन्तःपार्श्वेनौषिष्ठहनꣳ शिङ्गीनिकोश्याभ्याम् ॥ [३७] ॥

(चित्तमष्टादश) ॥ ३६ ॥

आ तिष्ठ वृत्रहन् रथय्ँयुक्ता ते ब्रह्मणा हरी। अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥ [३८] ॥

(आ तिष्ठषड्विꣳशतिः) ॥ ३७ ॥

इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसमृषीणाञ्च स्तुतीरुप यज्ञञ्च मानुषाणाम्॥ उपयामगृही-तोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥ [३९] ॥

(इन्द्रमित्त्रयोविꣳशतिः) ॥ ३८ ॥

असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि। आ त्वा पृणक्त्विन्द्रियꣳ रजः सूर्यन्न रश्मिभिः॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥ [४०] ॥

(असाविसप्तविꣳशतिः) ॥ ३९ ॥

सर्वस्य प्रतिशीवरी भूमिस्त्वोपस्थ आऽधित। स्योनाऽस्मै सुषदा भव यच्छाऽस्मै शर्म सप्रथाः॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥ [४१] ॥

(सर्वस्य षड्विꣳशतिः) ॥ ४० ॥

⋆

महाꣳ इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु। स्वस्ति नो मघवा करोतु हन्तु पाप्मानय्ँयोऽस्मान् द्वेष्टि॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥ [४२] ॥

(महान्षड्विꣳशतिः) ॥ ४१ ॥

⋆

सजोषा इन्द्र सगणो मरुद्भिः सोमम्पिब वृत्रहञ्छूर विद्वान्। जहि शत्रूꣳ रप मृधो नुदस्वाऽथाभयङ्कृणुहि विश्वतो नः॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥ [४३] ॥

(सजोषाःत्रिꣳशत्) ॥ ४२ ॥

⋆

उदु त्यञ्जातवेदसन्देवव्ँवहन्ति केतवः। दृशे विश्वाय सूर्यम्॥ चित्रन्देवानामुदगादनीकञ्चक्षुर् मित्रस्य वरुणस्याऽग्नेः। आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्। युयोद्ध्यस्मज्जुहुराण मेनो भूयिष्ठान्ते नमउक्तिव्ँविधेम॥ दिवङ्गच्छ सुवः पत रूपेण ॥ [४४] ॥ वो रूपमभ्यैमि वयसा वयः। तुथो वो विश्ववेदा वि भजतु वर्षिष्ठे अधि नाके॥ एतत्ते अग्ने राध ऐति सोमच्युतन्तन्मित्रस्य पथा नयर्तस्य पथा प्रेत चन्द्रदक्षिणा यज्ञस्य पथा सुविता नयन्तीर् ब्राह्मणमद्य राध्यासमृषिमार्षेयम्पितृमन्तम्पैतृमत्यꣳ सुधातुदक्षिणव्ँवि सुवः पश्य व्यन्तरिक्षय्ँयतस्व सदस्यै

रस्मद्दात्रा देवत्रा गच्छत मधुमतीः प्रदातारमा विशताऽनवहायाऽस्मान् देवयानेन पथेत सुकृ-
ताँल्लोके सीदत तन्नः सङ्स्कृतम् ॥ [४५] ॥

(रूपेणसदस्यैरष्टादश च) ॥ ४३ ॥

धाता रातिः सवितेदञ्जुषन्ताम्प्रजापतिर् निधिपतिर्नो अग्निः। त्वष्टा विष्णुः प्रजया सꣳर-
राणो यजमानाय द्रविणन्दधातु॥ समिन्द्र णो मनसा नेषि गोभिः सꣳ सूरिभिर्मघवन्थ् सङ्
स्वस्त्या। सम्ब्रह्मणा देवकृतय्यँदस्ति सन्देवानाꣳ सुमत्या यज्ञियानाम्॥ सवँर्चसा पयसा
सन्तनूभिरगन्महि मनसा सꣳ शिवेन॥ त्वष्टा नो अत्र वरिवः कृणो ॥ [४६] ॥ त्वनु मार्ष्टु
तनुवो यद्विलिष्टम्॥ यदद्य त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह। ऋधगयाडृधगु-
ताऽशमिष्ठाः प्रजानन्यज्ञमुप याहि विद्वान्॥ स्वगा वो देवाः सदनमकर्म य आजग्म सवनेद-
ञ्जुषाणाः। जक्षिवाꣳसः पपिवाꣳसश्च विश्वेऽस्मे धत्त वसवो वसूनि॥ यानाऽवह उशतो देव
देवान् तान् ॥ [४७] ॥ प्रेरय स्वे अग्ने सधस्थे। वहमाना भरमाणा हवीꣳषि वसुङ्घर्मन्दिवमा
तिष्ठतानु। यज्ञ यज्ञङ्गच्छ यज्ञपतिङ्गच्छ स्वाय्योनिङ्गच्छ स्वाहैष ते यज्ञो यज्ञपते सहसूक्तवाकः
सुवीरः स्वाहा देवा गातुविदो गातुव्वित्त्वा गातुमित मनसस्पत इमन्नो देव देवेषु यज्ञङ् स्वाहा
वाचि स्वाहा वाते धाः ॥ [४८] ॥

(कृणोतुतानष्टाचत्वारिꣳशच्च) ॥ ४४ ॥

उरुꣳ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ। अपदे पादा प्रतिधातवेऽकरुताऽप-
वक्ता हृदयाविधश्चित्॥ शतन्ते राजन् भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु। बाधस्व
द्वेषो निरृतिम्पराचैः कृतञ्चिदेनः प्र मुमुग्ध्यस्मत्॥ अभिष्ठितो वरुणस्य पाशोऽग्नेरनीकमप
आ विवेश। अपान्नपात् प्रतिरक्षन्नसुर्यन्दमेदमे ॥ [४९] ॥ समिधय्यँक्ष्यग्ने॥ प्रति ते जिह्वा
घृतमुच्चरण्येथ् समुद्रे ते हृदयमप्स्वन्तः। सन्त्वा विशन्त्वोषधीरुताऽऽपो यज्ञस्य त्वा यज्ञपते
हविर्भिः॥ सूक्तवाके नमोवाके विधेमाऽवभृथ निचङ्कुण निचेरुरसि निचङ्कुणाऽव देवैर् देवकृत-
मेनोऽयाडव मर्त्यैर् मर्त्यकृतमुरोरा नो देव रिषस्पाहि सुमित्रा न आप ओषधयः ॥ [५०] ॥

सन्तु दुर्मित्रास्तस्मै भूयासुर् योँऽस्मान् द्वेष्टि यञ्च वयन्द्विष्मो देवीराप एष वो गर्भस्तव्ँः सुप्रीतꣳ सुभृतमकर्म देवेषु नः सुकृतौ ब्रूतात् प्रतियुतो वरुणस्य पाशः प्रत्यस्तो वरुणस्य पाश एधोऽस्ये-धिषीमहि समिदसि तेजोऽसि तेजो मयि धेह्यपो अन्वचारिषꣳ रसेन समसृख्ष्महि। पयस्वाꣳ अग्न आ ऽगमन्तम्मा सꣳ सृज वर्चसा ॥ [५१] ॥

(दमेदमओषधय आषड्) ॥ ४५ ॥

यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यम्मर्त्यो जोहवीमि। जातवेदो यशो अस्मासु धेहि प्रजा-भिरग्ने अमृतत्वमश्याम्॥ यस्मै त्वꣳ सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम्। अश्विनꣳ स पुत्रिणव्ँवीरवन्तङ्गोमन्तꣳ रयिन्नशते स्वस्ति॥ त्वे सु पुत्र शवसोऽवृत्रन् कामकातयः। न त्वामि-न्द्राति रिच्यते॥ उक्थौक्थे सोम इन्द्रम्ममाद नीथेनीथे मघवानꣳ ॥ [५२] ॥ सुतासः। यदीꣳ सबाधः पितरन्न पुत्राः समानदख्षा अवसे हवन्ते॥ अग्ने रसेन तेजसा जातवेदो वि रोचसे। रख्षोहाऽमीवचातनः॥ अपो अन्वचारिषꣳ रसेन समसृख्ष्महि। पयस्वाꣳ अग्न आऽगम-न्तम्मा सꣳ सृज वर्चसा॥ वसुर् वसुपतिर्हिकमस्यग्ने विभावसुः। स्याम ते सुमतावपि॥ त्वामग्ने वसुपतिव्ँवसूनामभि प्र मन्दे ॥ [५३] ॥ अद्ध्वरेषु राजन्न्। त्वया वाजव्ँवाजयन्तो जयेमाऽभिष्याम पृथ्सुतीर् मर्त्यानाम्। त्वामग्ने वाजसातमव्ँविप्रा वर्द्धन्ति सुष्टुतम्। स नो रास्व सुवीर्यम्॥ अयन्नो अग्निर्वरिवः कृणोत्वयम्मृधः पुर एतु प्रभिन्दन्न्॥ अयꣳ शत्रूञ्जयतु जर्हृ-षाणोऽयव्ँवाजञ्जयतु वाजसातौ॥ अग्निनाऽग्निः समिद्ध्यते कविर् गृहपतिर् युवा। हव्यवाड्ञु-ह्वास्यः॥ त्वꣳ ह्यग्ने अग्निना विप्रो विप्रेण सन्थ्सता। सखा सख्या समिद्ध्यसे॥ उदग्ने शुचय-स्तव>१, वि ज्योतिषा>२ ॥ [५४] ॥

(मघवानंमन्देह्यग्नेचतुर्दश च) ॥ ४६ ॥

समाप्ति कोर्वैः

(आ द॑दे॒वा॒चस्पत॑यौपया॒मगृ॑हीतो॒ऽस्या वा॑यो अ॒यव्ँवा॒ं या वा᳚प्रात॒र्युजा॑व॒यंतं ये
दे॑वास्त्रि॒ꣳश॒दु॑पया॒मगृ॑हीतोऽसिमू॒र्द्धान॒ंमधु॒श्चेन्द्रा᳚ग्नी॒ ओमा॑सोम॒रुत्व॒न्त॒मिन्द्र॑ मरुत्वोम॒रुत्वा᳚न् म॒हान्म॒हान्
नृ॒वत्क॒दावा॒ममद॑ब्धेभि॒र्हि॒र॑ण्यपाणिꣳसु॒शर्मा॒बृ॒ह॒स्पति॑ सुतस्य॒ हरि॑र॒स्यग्न॒उत्ति॑ष्ठ॒न्त॒रणि॒ राप्या॑यस्वे॒युष्टे
येज्योति॑ष्मतींप्रया॒साय॑चि॒त्तमाति॒ष्ठेन्द्र॒मसा॑वि॒सर्व॑स्य॒महान्थ्स॒जोषा॒उदु॒त्यं धा॒तोरुꣳ हियस्त्वा॒ षट्चत्वारिꣳशत्)

(वा॒च प्रा॒णाय॑ त्वा)

(उ॒प॒या॒मगृ॑हीतोऽस्यपा॒नाय॑ त्वा)

(आ वा॑यो वा॒यवे॑ स॒जोषा᳚भ्यान्त्वा)

(अ॒यमृ॒ता॒युभ्या᳚न्त्वा)

(या वा॑म॒श्विभ्या॒म्माद्ध्वी᳚भ्यान्त्वा)

(प्रा॒त॒र्युजा॑व॒श्विभ्या॑म॒श्विभ्या᳚न्त्वा)

(अ॒यꣳ शण्डा॑य वी॒रता᳚म्पाहि)

(तम्मर्का॑य प्र॒जाः पा॑हि)

(ये दे॑वा स्त्रि॒ꣳशदा᳚ग्रय॒णोऽसि॒ विश्वे᳚भ्यस्त्वा दे॒वेभ्यः॑)

(उ॒प॒या॒मगृ॑हीतो॒ऽसीन्द्रा॑य त्वोक्था॒युवे᳚)

(मू॒र्द्धान॑म॒ग्नये᳚ त्वा वैश्वा॒नरा॑य)

(मधु॑श्च स॒ꣳ सर्पो᳚ऽसि)

(इन्द्रा᳚ग्नी इन्द्रा॒ग्निभ्या᳚न्त्वा)

(ओमा॑सो॒ विश्वे᳚भ्यस्त्वा दे॒वेभ्यः॑)

(म॒रुत्व॑न्त॒न्त्रीणीन्द्रा॑य त्वा म॒रुत्व॑ते)

(म॒हान्द्वे म॑हे॒न्द्राय॑ त्वा)

(क॒दा च॒नाऽऽदि॒त्येभ्य॑स्त्वा)

(क॒दा च॒न स्त॒रीर् विव॑स्व आदित्य)

(इन्द्र॒ꣳ शुचि॑र॒पः)

(वा॒मन्त्रीणी॑ दे॒वाय॑ त्वा सवि॒त्रे)

(सु॒शर्मा॑ऽसि॒ विश्वे᳚भ्यस्त्वा दे॒वेभ्यः॑)

(बृ॒ह॒स्पति॑सुतस्य॒ त्वष्टा॒ सोम॑म्पिब॒ स्वाहा᳚)

(हरि॑रसि॒ स॒हसो॑मा॒ इन्द्रा॑य॒ स्वाहा᳚)

(अग्न॒ आयूꣳ॑ष्यग्नये᳚ त्वा॒ तेज॑स्वते)

(उत्ति॒ष्ठन्निन्द्रा॑य॒ त्वौज॑स्वते)

(त॒रणिः सूर्या॑य त्वा॒ भ्राज॑स्वते)

(आ ति॑ष्ठा॒द्या॒ष॒टिन्द्रा॑य त्वा षो॒डशिने᳚)

(उदु॒ त्यञ्चि॒त्रम्)

(अग्ने॒ नय॒ दिव॑ङ्गच्छ)

(उ॒रुमा॒युष्टे॒ यद्दे॑वा मुमु॒ग्धि)

(अग्ना॑विष्णू सुक्रतू मुमुक्तम्)

(प॒रा वै प॒ङ्क्त्य॑ः)

(दे॒वा वै ये दे॒वाः प॒ङ्क्त्यौ᳚)

(प॒रा वै स वाच᳚म्)

(भू॒मिर्व्य॑तृष्यन्न्)

(प्र॒जाप॑ति॒र् व्य॑रुक्षुद्ध्यन्न्)

(भू॒मि॑रादि॒त्या वै)

(अ॒ग्नि॒हो॒त्रमा॑दि॒त्यो वै)

(भू॒मि॒र् लेक॒ः सले॑कः सु॒ले॑कः)

(विष्णो॒रु॑दु॒त्तमम्)

(अन्न॑पते॒ पुन॑स्त्वाऽऽदि॒त्याः)

(उ॒रुꣳ सꣳ सृ॑ज॒ वर्च॑सा)

(यस्त्वा॒ सुष्टु॑तम्)

(त्वम॑ग्ने यु॒क्ष्वा हि सु॑ष्टि॒तिम्)

(त्वम॑ग्ने॒ विच॑र्षणे)

(यस्त्वा॒ वि रो॑चसे)

(आ द॑दे॒ये दे॑वाम॒हानु॒त्तिष्ठ॒न्थ्सर्व॑स्य्यसन्तु दु॒र्मि॒त्राश्च॒तु॑ष्पञ्चा॒शत्)

(आ द॑दे॒वि ज्योति॑षा)

॥ हरिः ॐ ॥

प्रथमकाण्डे चतुर्थः प्रश्नः समाप्तः

अनुवाकाः	पञ्चाशत्यः
४६	५४

ॐ